श्रीसद्गुरुचरणारविन्दाभ्यां नमः

अधुना सर्वत्र जगति प्रसरतः जनानां प्राणापायकरस्य कोरोना-नामकस्य रोगविशेषस्य निवारणार्थं, श्रृङ्गेरी-जगद्गुरु-विरचित श्री-दुर्गा-परमेश्वरी-स्तोत्र-पारायणं करिष्ये ।

श्रृङ्गेरीजगद्गुरुविरचितम्

# ॥ श्रीदुर्गापरमेश्वरीस्तोत्रम् ॥

एतावन्तं समयं
सर्वापद्भ्योऽपि रक्षणं कृत्वा ।
देशस्य परमिदानीं
ताटस्थ्यं केन वहसि दुर्गाम्ब ॥ १ ॥

अपराधा बहुशः खलु
पुत्राणां प्रतिपदं भवन्त्येव ।
को वा सहते लोके
सर्वांस्तान्मातरं विहायैकाम् ॥ २ ॥

मा भज मा भज दुर्गे
ताटस्थ्यं पुत्रकेषु दीनेषु ।
के वा गृह्णन्ति सुतान्
मात्रा त्यक्तान्वदाम्बिके लोके ॥ ३ ॥

इतः परं वा जगदम्ब जातु
देशस्य रोगप्रमुखापदोऽस्य ।
न स्युस्तथा कुर्वचलां कृपाम्
इत्यभ्यर्थनां मे सफलीकुरुष्व ॥ ४ ॥

पापहीनजनतावनदक्षाः
सन्ति निर्जरवरा न कियन्तः ।
पापपूर्णजनरक्षणदक्षां
त्वां विना भुवि परां न विलोके ॥ ५ ॥